No. १२१४ घ

Title गणपत्युपनिषद्

Author

Extent २ पत्रे Age

Subject उपनिषद्

गणपत्युपनिषत्

१२१५

श्रीगणेशायनमः हरिः ॐ नमस्ते गणपतये त्वमेव प्रत्यक्षं तत्वमसि
त्वमेव केवलं कर्तासि त्वमेव केवलं धर्तासि त्वमेव केवलं हर्तासि
त्वमेव सर्वं खल्विदं ब्रह्मासि त्वं साक्षादात्मासि नित्यं ऋतं वच्मि
सत्यं वच्मि अव त्वं मां अव वक्तारं अव श्रोतारं अव दातारं
अव धातारं अवानूचानमव शिष्यं अव पश्चात्तात् अव पुरस्ता
त् अवोत्तरात्तात् अव दक्षिणात्तात् अव चोर्ध्वात्तात् अवाध
रात्तात् सर्वतो मां पाहि पाहि समंतात् त्वं वाङ्मयस्त्वं चिन्मय
स्त्वमानंदमयस्त्वं ब्रह्ममयः त्वं सच्चिदानंदाद्वितीयोसि त्वं प्रत्यक्षं
ब्रह्मासि त्वं ज्ञानमयो विज्ञानमयोसि सर्वं जगदिदं त्वत्तो जायते स
र्वं जगदिदं त्वत्तस्तिष्ठति सर्वं जगदिदं त्वयि लयमेष्यति सर्वं जगदि
दं त्वयि प्रत्येति त्वं भूमिरापोनलोनिलो नभः त्वं चत्वारि वाक्पदानि
त्वं गुणत्रयातीतः त्वं कालत्रयातीतः त्वं मूलाधारस्थितोसि नित्यं त्वं श

अथः

त्त्रियात्मकः त्वां योगिनो ध्यायंति नित्यं त्वं ब्रह्मा त्वं विष्णुस्त्वं रुद्रस्त्वमिंद्रस्त्व
मग्निस्त्वं वायुस्त्वं सूर्यस्त्वं चंद्रमास्त्वं ब्रह्म भूर्भुवः स्वरोम्॥ गणादीन्पूर्व
मुच्चार्य वर्णादिं तदनंतरं अनुस्वारः परतरः अर्धेंदुलसितं तारे
ण रुद्धं एतत्तव मनुस्वरूपं गकारः पूर्वरूपं अकारो मध्यमरूपं
अनुस्वारश्चांत्यरूपं बिंदुरुत्तररूपं नादः संधानं संहितासंधीः
॥ सैषा गणेशविद्या॥ गणक ऋषिः॥ निचृद्गायत्री छंदः॥ महागं
णपतिर्देवता॥ ॐ गं गणपतये नमः॥ एकदंताय विद्महे वक्रतुं
डाय धीमहि। तन्नो दंतिः प्रचोदयात्॥ एकदंतं चतुर्हस्तं पाशमं
कुशधारिणं॥ रदं च वरदं हस्तैर्बिभ्राणं मूषकध्वजं॥ रक्तं लंबोदरं शू
र्पकर्णकं रक्तवाससं॥ रक्तगंधानुलिप्तांगं रक्तपुष्पैः सुपूजितं॥ भक्ता
नुकंपिनं देवं जगत्कारणमच्युतं॥ आविर्भूतं च सृष्ट्यादौ प्रकृतेः पुरु

षासरं एवं ध्यायति यो नित्यं स योगी योगिनां वरः ॥ नमो व्रातपतये नमो गण
पतये नमः प्रमथपतये नमस्तेस्तु लंबोदरायैकदंताय विघ्ननाशि
ने शिवसुतवरदमूर्तये नमः ॥ एतदथर्वशिर्षं योधीते ॥ स ब्रह्मभूयाय
कल्पते ॥ स सर्वविघ्नैर्न बाधते ॥ स सर्वतः सुखमेधते ॥ स पंचमहापापा
त्प्रमुच्यते ॥ सायमधीयानो दिवसकृतं पापं नाशयति ॥ प्रातरधीया
नो रात्रिकृतं पापं नाशयति ॥ सायंप्रातः प्रयुंजानो अपापो भवति
॥ सर्वत्राधीयानोपविघ्नो भवति ॥ धर्मार्थकाममोक्षं च विंदति ॥ य
इदमथर्वशीर्षमशिष्याय न देयं ॥ यो यदि मोहाद्दास्यति ॥ स पापीया
न्भवति ॥ सहस्रावर्तनात् ॥ यं यं काममधीते ॥ तं तमनेन साधयेत्
॥ अनेन गणपतिमभिषिंचति ॥ स वाग्मी भवति ॥ चतुर्थ्यामनश्नन् जप
ति स विद्यावान्भवति ॥ इत्यथर्वणवाक्यं ब्रह्माद्याचरणं विद्यात्
न बिभेति कदाचनेति ॥ यो दूर्वांकुरैर्यजति ॥ स वैश्रवणोपमो भव

अथ: 2

ति ॥ यो लाजैर्यजति ॥ स यशोवान्भवति ॥ स मेधावान्भवति ॥ यो मोदक सहस्रेण यजति ॥ स वांछितफलमवाप्नोति ॥ यस्साज्य: समिद्भि र्यजति ॥ स सर्वं लभते स सर्वं लभते ॥ अष्टौ ब्राह्मणान्सम्यग्ग्राहयित्वा सूर्यवर्चस्वी भवति ॥ सूर्यग्रहे महानद्यां प्रतिमासन्निधौ वा जप्त्वा ॥ सिद्धमंत्रो भवति ॥ महाविघ्नात्प्रमुच्यते ॥ स सर्वविद्भवति स सर्वविद्भवति य एवं वेद ॥ इत्युपनिषत् ॥ सह नाववतु ॥ सह नौ भुनक्तु ॥ सह वीर्यं करवावहै ॥ तेजस्वि नावधीतमस्तु मा विद्विषावहै ॥ ॐ शांतिः शांतिः शांतिः ॥ ६ ॥ ६ ॥ ६ ॥ 2

महादोषात्प्रमुच्यते ॥ महापापात्प्रमुच्यते ॥